ते अव्य० तम—बा० डे। १त्वयेत्यर्थे त्रिका०। २गौर्य्यां तेनशब्दे दृश्यम्

**तेगा** स्त्री तिज—पुंसि घ जस्य गः। अप्रसिद्धदेवताभेदे। "शादं दद्भिरवकां दन्तमूलैर्मृदं वर्स्वैस्तेगां दंष्ट्राभ्याम्" यजु० २५।१। "तेगां देवतां शादाद्योऽप्रसिद्धा देवाः आदित्यादयः प्रसिद्धाः देवाः" वेददीपः। [अतेजीत्। तितेज।

**तेज** निशाने पालने च भ्वा० पर० सक० सेट्। तेजति

**तेजःफल** न० तेजसे फलमस्य तेजः फलति—फल अच् वा। (तेजवल) वृक्षभेदे "तेजःफलः कटुस्तीक्ष्णः सुगन्धिर्दीपनो मतः। वातश्लेष्मारुचिघ्नश्च बालरक्षाकरः स्मृत इति" भावप्र०।

**तेजन** पु० तेजयति शस्त्रमग्निं वा तिज—णिच्—ल्यु। १वंशे २मुञ्जे च अमरः संज्ञायां कन्। ३शराभिधे तृणे, करणे ल्युट्। ङीप्। ४मूर्वायां, ५ज्योतिष्मत्याञ्च स्त्री ङीप्। राजनि०। ६शस्त्रे अमरः।

**तेजपत्र** न० तेजयति तिज—णिच्-अच् तेजं पत्रमस्य। (तेजपात) ख्याते वृक्षभेदे। "तेजपत्रं वराङ्गं स्यात् त्वचं चोचं तथोत्कटम्। त्वचं लघूष्णं कटुकं स्वादु तिक्तञ्च रूक्षकम्। पित्तलं कफवातघ्नं कण्ड्वामारुचिनाशनम्। हृद्वस्तिरोगवातार्शःकृमिपीनसशुक्रहृत्" भावप्र०।

**तेजल** पु० तिज—करणे कलच्। कपिञ्जलपक्षिणि राजनि०।

**तेजस्** न० तिज—भावे करणादौ असुन्। १दीप्तौ २प्रभावे ३पराक्रमे ४रेतसि च मेदि०। ५देहजकान्तौ ६नवनीते ७वह्नौ च हेमच०। ८सुवर्णे ९मज्जनि १०पित्ते च राजनि०। सा०द०उक्ते सात्विके अधिक्षेपापमानादेरसहनरूपे ११नायकगुणभेदे यथा

"शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी। ललितौदार्य्यमित्यष्टौ सत्वजाः पौरुषा गुणाः" इत्युद्दिश्य "अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत्। प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम्" सा०द० लक्षितम्। १२सारे "रसादीनां शुक्रान्तानां धातूनां यत्परं तेजस्तत् खल्वोजस्तदेव बलमित्युच्यते" सुश्रु०। १३प्रागल्भ्ये १४पराभिभवसामर्थ्ये। १५परैरनभिभाव्यत्वे। १६अप्रतिहताज्ञत्वे। १७चैतन्यात्मके ज्योतिषि। १८स्त्रीबालकादिभिर्मूढैरनभिभाव्यत्वे। १९सत्वगुणजाते लिङ्गदेहे। २०हयवेगे।

"तेजोनाम दर्पापरनामा सत्त्वगुणविकारः प्रकाशकोऽन्तःसारविशेषः। यथाह भोजराजः "तेजोनिसर्गजं सत्त्वं वाजिनां स्फुरणं रजः। क्रोधस्तम इति ज्ञेयास्त्रयोऽपि सहजा गुणाः"। तच्च द्विविधम्। सततोत्थितं भयोत्थितञ्चेति। यथाह स एव "धारासु योजितानाञ्च निसर्गात् प्रेरणं विना। अवच्छिन्नमिवाभाति तत् तेजःसततोत्थितम्। कशापादादिघातैर्यत् साध्वसात् स्फुरितन्तु तदिति"। शब्दस्पर्शतन्मात्रसहिताद्रूपतन्मात्रादुत्पन्ने शब्दस्पर्शरूपगुणे २१तृतीये महाभूते। यथा "तृतीयं ज्योतिरित्याहुश्चक्षुरध्यात्ममुच्यते। अधिभूतं ततो रूपं सूर्य्यस्तत्राधिदैवतम्" भा०आश्व०। उष्णस्पर्शवत्तेजः। "तद्द्विविधम्। नित्यमनित्यञ्च। नित्यं परमाणुरूपम्। अनित्यं कार्य्यरूपम्। पुनस्त्रिविधम्। शरीरेन्द्रियविषयभेदात्। शरीरमादित्यलोके। इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्त्ति विषयश्चतुर्विधः। भौमदिव्यौदर्य्याकरजभेदात्। भौमं वह्न्यादिकम्। अबिन्धनं दिव्यं विद्युदादि। भुक्तस्य परिणामहेतुरौदर्य्यम्। आकरजं सुवर्णादि" तर्कसंग्रहः "स्पर्श उष्णस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम्। नैमित्तिकं द्रवत्वन्तु नित्यतादि च पूर्ववत्। इन्द्रियं नयनं वह्निस्वर्णादिर्विषयो मतः" इति भाषाप०।

उपचारात् २२तेजस्विनि च। "त्रीणि तेजांसि नोच्छिष्ट आलभेत कदाचन" "अग्निं गां ब्राह्मणं चैव" भा० आनु०५०१७ श्लो०। स्वपरप्रकाशकं तेजः अन्धकारविरोधि तल्लक्षणञ्च शुक्लभास्वररूपसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वम्। तेजसो गुणादिकमग्निशब्दे ६८ पृ० दृश्यम्। "सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः" माघः। भुक्ततेजसः कार्य्यञ्च छा० उ० दर्शितं "तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तदस्थि भवति यो मध्यमः स मज्जा योऽणिष्ठः सा वाक्। "अन्नमयं हि सौम्य! मन आपोमयः प्राणस्तेजोमयी वागिति च" तेजोभूतञ्च वायुकार्य्यमपां कारणञ्च। यथोक्तं "अद्भिः सौम्य! शुङ्गेन तेजोमूलमन्विच्छ" छा० श्रुतिः २३रजोगुणे तैजसशब्दे दृश्यम् तेजसा निर्वृत्तः अण् तेजोजन्ये त्रि०। तेजस्+अस्त्यर्थे विनि। तेजस्विन् मतुप् मस्य वः तेजस्वत्। तेजोविशिष्टे त्रि० स्त्रियां सर्वत्र ङीप्। तैजसी तेजस्विनी तेजस्वती। २४वीर्य्ये च। [द्रव्ये स्त्रियां ङीप्।

**तेजस्कर** त्रि० तेजः करोति कृ—हेत्वादौ ट। तेजोहेतौ

**तेजस्य** त्रि० तेजसि साधु यत्। तेजःसाधने "यावामिन्द्रावरुणा सहस्या रक्षस्या तेजस्या तनूः" तै०स०२।३।१३।१।

**तेजस्वत्** त्रि० तेजस्+अस्त्यर्थे मतुप् मस्य वः। तेजोयुक्ते